I also adopted the usual practice of placing the figures १ and ३ after short and long Svarita vowels, when followed by an Udātta syllable, although the MSS. never use these figures. They write, e. g. **खल्व्यं ताम्°** I, 1, 3, **°द्दृत्वस्सं वि°** I, 4, 9, **नवो यानि** I, 7, 9, **मनुष्या वपन्ति** I, 11, 6 etc.

Supplementary Note to page xiii.

I see from the 'Catalogue of the Library of the India Office, Vol. II.—Part I. Sanskrit Books,' which has just been published, that there is also an edition of the 'Mantraprasna' in Grantha characters, printed at Madras, 1882. Unfortunately the book is not accessible at present.

NATIONAL ARCHIVES OF INDIA

LIST OF ABBREVIATIONS.

Āp. = Āpastambīya Gṛhyasūtra (ed. M. Winternitz).
Āp. Dh. = Āpastambīya Dharmasūtra (ed. G. Bühler).
Āp. Śraut. = Āpastambīya Śrautasūtra (ed. R. Garbe).
Āśv. = Āśvalāyana-Gṛhyasūtra (ed. A. F. Stenzler).
Av. = Atharvaveda-Saṃhitā.
B. = Dr. Bühler's Vienna MS. I, 299 (Devanāgarī, with accents).
Baudh. = Baudhāyana-Gṛhyasūtra (quoted from Dr. Bühler's MS.).
Bhār. = Bhāradvāja-Gṛhyasūtra (quoted from Dr. Bühler's MS.).
Bṛh. Up. = Bṛhadāraṇyaka-Upanishad.
Bu. = Burnell's India Office MS., No. 50 (Grantha).
E. = Elphinstone College MS., No. 17 (Devanāgarī, with accents).
H. = Haradatta's commentary on the Mantrapāṭha.
Hbd. = Dr. Bühler's Devanāgarī MS. of Haradatta (Vienna MS. 296).
Hbg. = Dr. Bühler's Grantha MS. of Haradatta (Vienna MS. 312).
HHg. = Dr. Hultzsch's Grantha MS. of Haradatta.
Hir. = Hiraṇyakeśi-Gṛhyasūtra (ed. J. Kirste).
Hw. = R. A. S. MS. Whish, No. 26, of Haradatta (Grantha).
Kauś. = Kauśikasūtra (ed. M. Bloomfield).
Maitr. S. = Maitrāyaṇī Saṃhitā (ed. L. v. Schroeder).
MBr. = Mantra-Brāhmaṇa of the Sāmaveda (ed. by Satyavrata Sāmaśrami, in vol. i. of the Ushā).
MSS. = Manuscripta omnia (includes **T.**, unless the contrary be stated).
P. = Bodleian MS. Sansk. d. 1 of the Āpastambīya-Saṃskāra-Prayoga.
Pār. = Pāraskara-Gṛhyasūtra (ed. A. F. Stenzler).
Rv. = Rigveda-Saṃhitā.
Rv.-Ms. = Ṛgveda-Mantrasaṃhitā (lithographed, Bombay, 1891, Śake 1813).
Śāṅkh. = Śāṅkhāyana-Gṛhyasūtra (ed. H. Oldenberg, Indische Studien, vol. xv).
Śat. Br. = Śatapatha-Brāhmaṇa.
T. = Telugu edition of the Mantrapāṭha.
TĀ. = Taittirīya-Āraṇyaka.
TBr. = Taittirīya-Brāhmaṇa.
Ts. = Taittirīya-Saṃhitā.
Vs. = Vājasaneyi-Saṃhitā.
W. = Bodleian MS. Wilson 468 (Devanāgarī, with accents).
Wh. = R. A. S. MS. Whish, No. 25 (Grantha).

NATIONAL ARCHIVES OF INDIA

TEXT OF THE MANTRAPĀṬHA,

WITH

CRITICAL NOTES.

NATIONAL ARCHIVES OF INDIA

NATIONAL ARCHIVES OF INDIA

॥ अथ मन्त्रपाठः ॥

॥ श्रीगणेशाय नमः ॥ हरिः ओँ ॥

प्र सु ग्मन्ता धियसानस्य सक्षणि वरेभिर्वरॉं अभि षु प्र सीदत ।
अस्माकमिन्द्रं उभयं जुजोषति यत्सोम्यस्यान्धसो बुबोधति ॥१॥
अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् ।
समर्यमा सं भगो नो निनीयात्सं जास्पत्यँ सुयममस्तु देवाः ॥२॥
अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते ।
इन्द्रापुत्रघ्नीं लक्ष्म्यं१ तामस्यै संवितस्सुव ॥३॥
अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यस्सुमनास्सुवर्चाः ।
जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥४॥

I, 1, 1a प्र सु ग्मन्ता धियसानस्य W. E.—षु प्र सीदत W. षु प्र सीदतः E. षु प्र सीदता Bu. षु प्रसीदतः Rv. X, 32, 1. 1b जिजोषति B.—यत्सो° MSS. यत्सो° P. Rv. l.c. 2b जास्पत्यँ E.—Rv. X, 85, 23. 3a अभ्रातृघ्नीं W. E. 3b °पुत्रघ्नीं B.—सुवा Bu. सुवः E. See Av. XIV, 1, 62. 4a °पतिघ्नियेधि W. Bu. B pr. m.—पतिभ्यः B. Bu. Wh. H. T. पशुभ्यः W. E. P. Rv. X, 85, 44. 4b जीवसू° MSS. H. वीरसू° Rv. l.c.

NATIONAL ARCHIVES OF INDIA

इदमहं या त्वयि पतिघ्नलक्षिस्तां निर्दिशामि ॥५॥
जीवाँ रुदन्ति वि मयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वजे ॥६॥
व्युक्षन्कूरमुदचन्वाप आस्यै ब्राह्मणा स्वपनं हरन्तु।
अवीरघ्नीरुदचन्वापः ॥७॥
अर्यम्णो अग्निं परि यन्तु क्षिप्रं प्रतीक्षन्ताँ श्वश्रुवो देवराश्च ॥८॥
खेऽनसः खे रथः खे युगस्य शचीपते।
अपालामिन्द्र त्रिः पूर्व्यैकरत्सूर्यत्वचसम् ॥९॥
शं ते हिरण्यं समु शन्त्वापश्शं ते मेथी भवतु शं युगस्य तृध्नं।

5 पतिघ्नलक्षिस्तां नि° Wh. H. T. पतिघ्नलक्ष्यस्तां नि° W. P. पतिघ्नियलक्ष्यस्तां नि° E. पतिघ्नि (घ् sec. m.) यलक्षियस्तान्नि° B. पतिघ्नायलक्षिस्तान्नि° Bu. 6a जीवं Rv. X, 40, 10. 6b परिष्वजे B. 7 and 8 See Av. XIV, 1, 39. 8 अर्यम्णो E.—°चन्ताँ श्वश्रुवो Bu. Wh. Hw. HHg. (lacuna in Hbd. Hbg.) °चन्ताँ स्वश्रवो W. E. P. °चंताँ श्वश्रवो B. °चन्तां श्वश्रवो T. 9a खेऽनसः खे रथः B. खेनसः खे रथः W. E. खेनसः खे रथः Bu. Wh. H. P. T. खे रथस्य खेऽनसः Rv. VIII, 91, 7.—युगस्य W. E.—शचीपते MSS. शतक्रतो Rv. l.c. 9b °मिद्रुस्रः W. In Bu. it looks like °मिन्द्रुस्रिः, but the leaf is damaged just where the Akshara occurs, and it may have been °मिन्द्र त्रिः.—पूर्व्यकरत् B. पूर्व्यकरत् Wh. P. T. पूत्व्यकरत् Bu. See Introd., p. xvi. 10a समु शंत्वापः B. E. समु शन्त्वापः Wh. H. P. शमु सन्त्वापः Bu. शमु संत्वापः W. T. Av. XIV, 1, 40. See Introd., p. xvi. —मेथी B. W. E. Hbd. Hbg. P. मेधी Wh. Hw. T. In Bu. the two letters थ् and ध् are not kept distinct in writing, so that we may read either मेथी or मेधी in this MS. See I, 9, 6.—शन्तनश्च तृत्स Wh.

NATIONAL ARCHIVES OF INDIA

शं न आपश्शंतपविषा भवन्त्वघा पत्या तन्वँ१ सँ सृजस्व ॥१०॥

प्रथमः खण्डः ॥१॥

हिरण्यवर्णाश्शुचयः पावकाः प्र चक्रमुर्हित्वावद्यमापः।
शं पविचा वितता ह्यासु ताभिष्ट्वा देवस्सविता पुनातु ॥१॥
हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्वग्निः।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥२॥
यासाँ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥३॥
यासाँ देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा निविष्टाः।
या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपश्शँ स्योना भवन्तु ॥४॥
शिवेन त्वा चक्षुषा पश्यन्त्वापश्शिवया तन्वोप स्पृशन्तु त्वचं ते।
घृतश्चुतश्शुचयो याः पावकास्तास्त आपश्शँ स्योना भवन्तु ॥५॥
परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः।
वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः ॥६॥

10b तन्वँ E.—कृणुता Bu.—प्रथमः खण्डः ॥ Wh. ॥१॥ Bu. प्र सु ग्मन्ताष्टादश ॥१॥ W. E. ॥१॥ प्र सु ग्मंताष्टादश ॥ B. I, 2, 1b ताभिस्त्वा W. B. E. P. 3a सवितृते Bu. 4a देवां Bu.—निविष्टाः E. 5a पश्यत्वापः E. पश्यंत्वापः W. पश्यंत्वापः B.—तनुवोपं स्पृशन्तु B. तन्वोपस्पृशंतु E. तनुवोप स्पृशन्तु Bu. 5b घृतः च्युतः शुचयोः Bu.—To Mantras 2–5, see Av. I, 33; Ts. V, 6, 1, 1–2; TBr. II, 8, 9, 3. 6 Rv. I, 10, 12.

आशासाना सौमनसं प्रजाँ सौभाग्यं तनूम् ।
अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कम् ॥७॥
पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्र वहताँ रथेन ।
गृहान्गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ॥८॥

°द्वितीयः खण्डः ॥२॥

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ॥१॥
सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये ।
रयिं च पुत्राँश्चादादग्निर्मह्यमथो इमाम् ॥२॥
गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥३॥
ते हि पूर्वे जनासो ये पूर्वेह्नो हिताः ।
मूर्धन्वान्यच सौभवः पूर्वो देवेभ्य आतपत् ॥४॥

7 Wh. only gives this Mantra in full. All the other MSS. have only आशासानेषा ॥ I have supplied the accents from Ts. I, 1, 10, 1. See also TBr. III, 3, 3, 2; Âp. Śraut. II, 5, 2; Av. XIV, 1, 42. 8a गंयतु W. E.—°श्विनौ MSS. °श्विना Rv. X, 85, 26.—रथेना Bu. 8b द्वितीयः खण्डः ॥ Wh. ॥२॥ Bu. ॥ हिरण्यवर्णाः पञ्चदश ॥२॥ E. . हिरण्यवर्णाः पंचदश ॥१५॥२॥ W. ॥२॥ हिरण्यवर्णाः पंचदश ॥ B. I, 3, 1 and 2 Rv. X, 85, 40; 41. 3a सुप्रजास्त्वाया Bu. सौमनस्त्वाय Rv. X, 85, 36.—जरदष्टि° W. 4b सौभुवः B.—आतपत T.

सरस्वति प्रेदमव सुभगे वाजिनीवति ।
तां त्वा विश्वस्य भूतस्य प्र गायामस्यय्तः ॥५॥
य एति प्रदिशस्सर्वा दिशोऽनु पवमानः ।
हिरण्यहस्त ऐरम्मस्स त्वा मन्मनसं कृणोतु ॥६॥

एकमिषे विष्णुस्त्वान्वेतु ॥७॥ द्वे ऊर्जे विष्णुस्त्वान्वेतु ॥८॥ त्रीणि व्रताय विष्णुस्त्वान्वेतु ॥९॥ चत्वारि मायोभवाय विष्णुस्त्वान्वेतु ॥१०॥ पञ्च पशुभ्यो विष्णुस्त्वान्वेतु ॥११॥ षडृतुभ्यो विष्णुस्त्वान्वेतु ॥१२॥ सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वान्वेतु ॥१३॥

सखा सप्तपदा भव सखायौ सप्तपदा बभूव । सख्यं ते गमेयं सख्यात्ते मा योषं सख्यान्मे मा योष्ठाः । समयाव सं कल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि संवसानौ । सं नौ मनाँसि सं व्रता समु चित्तान्या करम् । सा त्वमस्यमूहममूहमस्मि सा त्वं द्यौरहं पृथिवी त्वँ रेतोऽहँ रेतोभृत्त्वं मनोऽहमस्मि

5b °स्वं प्रगाथा° W. E. 7 °न्वेतु W. E. B. 8–12 Wh., P., and T. have विष्णुस्त्वान्वेतु at the end of each Mantra. The other MSS. read त्रीणि व्रतायं चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सप्त etc. But the Commentator says: सर्वत्र विष्णुस्त्वान्वेत्यित्यनुषङ्गः । 13 °न्वेतु B. E. W. 14a भवा Bu.—सप्तपदा बभूव B. सप्तपदा बभूव (°वा Bu.) Wh. Bu. H. P. T. सप्तपदा बभूम E. सप्तपदाबभूव W. But W. often has व for व, e.g. बुबोधति I, 1, 1, for बुबोधति. See Introd., p. xvi seq. 14 c–e Cf. Ts. IV, 2, 5, 1. 14f °स्वमूहमंमूहमस्मि W. E. °स्वं (मूहमं marg.) मूहमंस्मि B. °स्वमूहममूहमस्मि Wh. Bu. H. P. T. अमोऽहमस्मि Av. XIV, 2, 71. See also Brh. Up. VI, 4, 19, and Introd., p. xxvii.—रेतोभृत्वं E. W.

वाङ्कँ सामाहमस्म्यृङ्कँ सा मामनुव्रता भव पुँसे पुत्राय वेत्तवे स्त्रियै पुत्राय वेत्तवा एहि सूनृते ॥१४॥

तृतीयः खण्डः ॥३॥

सोमाय जनिविदे स्वाहा ॥१॥
गन्धर्वाय जनिविदे स्वाहा ॥२॥
अग्नये जनिविदे स्वाहा ॥३॥
कन्यला पितृभ्यो यती पतिलोकमव दीक्षामदास्य स्वाहा ॥४॥
प्रेतो मुञ्चामि नामुतस्सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वस्सुपुत्रा सुभगासति ॥५॥
इमां त्वमिन्द्र मीढ्वस्सुपुत्राँ सुभगाँ कुरु ।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥६॥
अग्निरैतु प्रथमो देवतानाँ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् ।
तदयँ राजा वरुणोऽनु मन्यतां यथेयँ स्त्री पौत्रमघं न रोदात् ॥७॥

14f °स्म्यृत्वँ E. °ऋत्कं Wh.—मामनुव्रता भव E.—पुँसपुत्राय E.—वेत्तवे E.W.B. वेत्तवे Bu. Hbd. Hbg. P. T. वेत्तवे Wh. Hw.—स्त्रियै पुत्राय वेत्तवा एहि सूनृते (without accents) B.—वेत्तवे Hbd. Hbg. वेत्तव E. वेत्तव W. वेत्तव Bu. Wh. T. वेत्तवे Hw.—तृतीयः खण्डः ॥ Wh. ॥३॥ Bu. ॥१७॥ सोमः प्रथमः पोऽउग्र ॥३॥ W. ॥सोमः प्रथमः पोऽउग्र ॥३॥ E. ॥३॥ सोमः प्रथमः पोऽउग्रः ॥३॥ B. I, 4, 4 यदी W. यति B pr. m. Wh. T.—°दाक्षः W. Cf. Av. XIV, 2, 52; MBr. I, 2, 5. 5 Cf. Rv. X, 85, 25. 6a कुरु Bu. Wh. Hw. Hbg. T. क्रतु B. W. E. Rv. X, 85, 45. Hbd. has कुरु corrected (by the same hand) from क्रतु. 7a °रैतु B.—सोऽस्यै B.—Cf. MBr. I, 1, 10.

NATIONAL ARCHIVES OF INDIA

इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अन्वूनोपस्था जीवतामस्तु माता पौत्रमानन्दमभि प्र बुध्यता-
मियम् ॥८॥
मा ते गृहे निशि घोष उत्थादन्यत्र त्वदुदत्यꣳसं विशन्तु ।
मा त्वं विकेश्युर् आ वधिष्ठा जीवपत्नी पतिलोके वि राज
पश्यन्ती प्रजाँ सुमनस्यमानाम् ॥९॥
द्यौस्ते पृष्ठँ रक्षतु वायुरूरू अश्विनौ च स्तनं धयन्नँ सविताभि
रक्षतु ।
आ वाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभि रक्षन्तु पश्चात् ॥१०॥
अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाघम् ।
शीर्ष्णे स्रजमिवोन्मुच्य द्विषद्भ्यः प्रति मुञ्चामि पाशम् ॥११॥
इमं मे वरुण श्रुधी हवमद्या च मृडय ।
त्वामवस्युरा चके ॥१२॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोध्युरुशꣳस मा न आयुः प्र मोषीः ॥१३॥

8a °मंशो B.—Cf. MBr. I, 1, 11. 9b विकेशु° E.—आवधिष्ठा W. E. आ वधित्वा B.—Cf. MBr. I, 1, 13. 10 Cf. MBr. I, 1, 12. 11a वा अघं Bu. 11b °मुच्याव E.—Cf. MBr. I, 1, 14; Av. VIII, 6, 26. 12–15 Wh. and P. give these verses in full. The other MSS. give the Pratīkas, viz. इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने. See Ts. II, 1, 11, 6; II, 5, 12, 3 seq.; Rv. I, 25, 19; I, 24, 11; IV, 1, 4 and 5; TBr. III, 7, 11, 3; 12, 6; TĀ. IV, 20, 3.

NATIONAL ARCHIVES OF INDIA

त्वं नो॑ अग्ने॒ वरु॑णस्य वि॒द्वान्दे॒वस्य॑ हेडो॒ऽव॑ यासिसीष्ठाः ।
यजि॑ष्ठो॒ वह्नि॑तमश्शोशु॒चानो॒ विश्वा॒ द्वेषाँ॑सि॒ प्र मु॑मुग्ध्य॒स्मत् ॥१४॥
स त्वं नो॑ अग्नेऽव॒मो भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ ।
अव॑ यक्ष्व नो॒ वरु॑णँ॒ ररा॑णो वी॒हि मृ॑डी॒कँ सु॒हवो॑ न एधि ॥१५॥
त्वम॑ग्ने अ॒यास्य॒यासन्म॑न॒सा हि॒तः ।
अ॒यास॑न्ह॒व्यमू॑हिषे॒ऽया नो॑ धेहि भेष॒जम् ॥१६॥

तुरीयः खण्डः ॥४॥

आ ति॑ष्ठ॒मम॑श्मा॒नम॑श्मे॒व त्वँ स्थि॒रा भ॑व ।
अ॒भि ति॑ष्ठ पृतन्य॒तस्स॒हस्व पृ॑तनाय॒तः ॥१॥
इ॒यं नार्यु॑प ब्रू॒ते कु॒ल्पान्या॒वप॑न्ति॒का ।
दी॒र्घायु॑रस्तु मे॒ पति॒र्जीवा॑तु श॒रद॑श्श॒तम् ॥२॥
तुभ्य॑मग्ने॒ पर्य॑वहन्सू॒र्यां व॑ह॒तुना॑ स॒ह ।
पुन॒: पति॑भ्यो जा॒यां दा अ॑ग्ने प्र॒जया॑ स॒ह ॥३॥

16 See TBr. II, 4, 1, 9. Both Sāyaṇa on this passage, and H. on our Mantra, explain अयासि = अयाः असि, and अयासन् = अयाः सन्.—तुरीयः खण्डः ॥ Wh. ॥४॥ Bu. ॥४॥ सोमाय जनिविदेष्टादश ॥४॥ W.B.E. In B. these notes at the end of the Khaṇḍas are always given without accents. I, 5, 1a भवा Bu. 2a नार्युप W. E.—कुल्पान्वा° B. कुल्पान्वा° Bu. HHg. Hbd. P. T. कुल्पान्वा° W. E. कुल्पान्वा° Wh. Hw. कूल्पानि Hbg. See Av. XIV, 2, 63; MBr. I, 2, 2; Pār. I, 6, 2; Śāṅkh. I, 14, 1; Hir. I, 20, 3. 2b दीर्घायुरस्तु W. E. 3a °न्सूर्यां E. °न्सूर्यां W. °न् सूर्यामि Bu. °न् सूर्यां Wh. °न्सू° T. 3b दाग्ने Bu.—Rv. X, 85, 38.

NATIONAL ARCHIVES OF INDIA

पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिस्स एतु शरदश्शतम् ॥४॥
विश्वा उत त्वया वयं धारा उदन्या इव ।
अति गाहेमहि द्विषः ॥५॥
आ तिष्ठेममश्मानम् ॥६॥
अर्यमणं नु देवं कन्या अग्निमयक्षत ।
स इमां देवो अध्वरः प्रेतो मुञ्चाति नामुतस्सुबद्धाममुतस्करत् ॥७॥
तुभ्यमग्ने पर्यवहन् ॥८॥
पुनः पत्नीमग्निरदात् ॥९॥
विश्वा उत त्वया वयम् ॥१०॥
आ तिष्ठेममश्मानम् ॥११॥
त्वमर्यमा भवसि यत्कनीनां नाम स्वधावन्त्स्वयं बिभर्षि ।
अञ्जन्ति वृक्षं सुधितं न गोभिर्यद्दंपती समनसा कृणोषि ॥१२॥

4a पत्नीरग्नि° B. 4b दीर्घायुरस्या E. W.—पतिः स एतु B. E. W. Bu. H. T. पतिर्जीवातु Wh. पतिर्जीवाति Rv. X, 85, 39. 5a इवा Bu.—Rv. II, 7, 3. 6 *Id est* verse 1 to be repeated. 7a तु Bu.—कन्या E.—°यचता Bu.—See MBr. I, 2, 3; Rv. X, 85, 25; Av. XIV, 1, 17 seq. 7b मुंचातु P. 8–10 *I. e.* 3–5 repeated. 11 *I. e.* 1 repeated. 12a स्वधावत्स्वर्यं E. W. स्वधावत्स्वर्यं B. स्वधावन्गुह्यं Rv. V, 3, 2. Haradatta must have read स्वधावत्स्वर्यं. — बिभर्षि E. H. बिभर्षि W. बिभर्षि B. Rv. l. c. 12b वृक्षं MSS. मिवं Rv. l. c.

NATIONAL ARCHIVES OF INDIA

तुभ्यमग्ने पर्यवहन् ॥१३॥
पुनः पत्नीमग्निरदात् ॥१४॥
विश्वा उत त्वया वयम् ॥१५॥
प्र त्वा मुञ्चामि वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुकेतः ।
धातुश्च योनौ सुकृतस्य लोके स्योनं ते सह पत्या करोमि ॥१६॥
इमं वि ष्यामि वरुणस्य पाशं यमबध्नीत सविता सुशेवः ।
धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या कृणोमि ॥१७॥
अयाश्चाग्नेऽस्यनभिशस्तीश्च सत्यमित्त्वमया असि ।
अयसा मनसा धृतोऽयसा ह्व्यमूहिषेऽया नो धेहि भेषजम् ॥१८॥

पञ्चमः खण्डः ॥५॥

सत्येनोत्तभिता भूमिस्सूर्येणोत्तभिता द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥
युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥२॥

13–15 *i.e.* 3–5 repeated. 16b सुकृतस्य E.—ते W. Wh. Bu. P. T. मे B.E. Cf. Rv. X, 85, 24; Av. XIV, 1, 19; 58. 17b ऋतस्य W.—See Ts. I, 1, 10, 2; Rv. X, 85, 24. 18a अयाश्चाग्नेस्यनभि° W. E.—सत्यमित्त्वमया B. सत्यमित्त्वमया W. E. सत्यमित्त्वमया Wh. सत्यमित्त्वामया Bu. 18b अयसा E.—धृतोयसा W. E.—पञ्चमः खण्डः ॥ Wh. ॥५॥ Bu. ॥५॥ ॥ आ तिष्ठेमं चयोविँंशतिः ॥५॥ E. W. B. I, 6, 1. Rv. X, 85, 1. 2 and 3 are given in full by Wh. and P. The other MSS. give the Pratīkas, viz. युञ्जन्ति ब्रध्नं योगेयोगे ॥ See Rv. I, 6, 1; 30, 7; Ts. VII, 4, 20, 1; IV, 1, 2, 1.

NATIONAL ARCHIVES OF INDIA

योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥३॥
सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णं सुवृतँ सुचक्रम् ।
आ रोह वध्वमृतस्य लोकँ स्योनं पत्ये वहतुं कृणुष्व ॥४॥
उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः ।
मूर्धानं पत्युरा रोह प्रजया च विराड्व ॥५॥
सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रुवां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥६॥
सुषाणाँ श्वशुराणां प्रजायाश्च धनस्य च ।
पतीनां च देवृणां च सजातानां विराड्व ॥७॥
नीललोहिते भवतः कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥८॥
ये वध्वश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥९॥

4a सुवृत्तँ T. 4b वध्व° MSS. सूर्यै च° Rv. X, 85, 20.—कृणुष्वा Bu. 5a उदुत्तरमा° E. W. 6a संम्राज्ञी E. W. B. सम्राज्ञी Bu.—संम्राज्ञीं E. W. B. Bu.—श्वश्रुवां Wh. Bu. Hw. Hbd. P. श्वश्रवां Hbg. स्वश्रवां E. श्वश्रवान् W. श्वश्रवां B. श्वश्रूवां B sec. m. T. Rv. X, 85, 46. See above, I, 1, 8. 6b संम्राज्ञीं W. B. Bu.—संम्राज्ञी E. W. B. Bu. 7b देवरृणां W. B. P. देवरृणां E. 8b एधन्तेस्या Wh. Bu.—See Rv. X, 85, 28. 9a वध्व° E. W.—जनाँ अनु MSS. and H. = Av. XIV, 2, 10. जनादनु Rv. X, 85, 31. 9b नयंति B. नंयन्तु E.

NATIONAL ARCHIVES OF INDIA

मा विंदन्परिपन्थिनो य आसीदन्ति दंपती ।
सुगेभिर्दुर्गमतीतामपं द्रान्त्वरातयः ॥१०॥
सुगं पन्थानमारुक्षमरिष्टं स्वस्तिवाहनम् ।
यस्मिन्वीरो न रिष्यत्यन्येषां विन्दते वसु ॥११॥
ता मन्दसाना मनुषो दुरोण आ धत्तं रयिं दशवीरं वचस्यवे ।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामपं दुर्मतिं हतम् ॥१२॥
अयं नो मह्याः पारं स्वस्ति नेषद्बृहस्पतिः ।
सीरा नस्सुतरा भव दीर्घायुत्वाय वर्चसे ॥१३॥
अस्य पारे निर्ऋथस्य जीवा ज्योतिरशीमहि ।
मह्या इन्द्र स्वस्तये ॥१४॥

षष्ठः खण्डः ॥ ६ ॥

यदृते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।
संधाता सन्धिं मघवा पुरोवसुर्निष्कर्ता विहुतं पुनः ॥१॥
इडामग्ने पुरुदꣳसꣳ सनिं गोश्शश्वत्तमꣳ हवमानाय साध ।

10 Rv. X, 85, 32. 11 b विंदते B. See Av. XIV, 2, 8.—B. E. W. T. mark here the end of Khaṇḍa 6. See below, I, 7, 12. The Grantha MSS. (Bu. Wh.) and Haradatta mark the end of the Khaṇḍa after verse 14. See also p. 30, note 1. 12a दशवीरं MSS. and H. सहवीरं P. Rv. X, 40, 13. 13a °बृहस्पतिः W. 14a निर्ऋतस्य W.—षष्ठः खण्डः ॥ Wh. ॥ ६ ॥ Bu. I, 7, 1a जत्रुभ्यं B. P. जत्रुभ्य Bu. 1b विहुतं E. W. P.—See TĀ. IV, 20, 1; Rv. VIII, 1, 12; Av. XIV, 2, 47. 2 Wh. and P. give this Mantra in full, the other MSS. give the Pratīka, reading इडामग्न इमं etc.

NATIONAL ARCHIVES OF INDIA

स्याऽन्नस्सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥२॥
इमं मे वरुण ॥३॥
तत्त्वा यामि ॥४॥
त्वं नो अग्ने ॥५॥
स त्वं नो अग्ने ॥६॥
त्वमग्ने अयासि ॥७॥
ये गन्धर्वा अप्सरसश्च देवीरेषु वृक्षेषु वानस्पत्येष्वासते ।
शिवास्ते अस्यै वध्वै भवन्तु मा हिँसिषुर्वहतुमूह्यमानाम् ॥८॥
या ओषधयो या नद्यो३ यानि धन्वानि ये वना ।
ते त्वा वधु प्रजावतीं प्र ते मुञ्चन्त्वँहसः ॥९॥
सं कॉशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण ।
पर्याणद्धं विश्वरूपं यदस्याँ स्योनं पतिभ्यस्सविता कृणोतु तत् ॥१०॥
आ वामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामाँ अयँसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ॥११॥

See Rv. III, 1, 23; Ts. IV, 2, 4, 3. 3–7=I, 4, 12–16. 8a गन्धर्वाप्सरसश्च E. P.—देवीरेषु B. 8b °मूह्यमानाम् Wh. Bu. H. T. °मोह्यमानां B. E. W. P. °मुह्यमानाम् Av. XIV, 2, 9. 9a वनाः E. P. वर्ण B. 9b त्वावतु E. W. त्वावंतु P.—See Av. XIV, 2, 7. 10 See Av. XIV, 2, 12. 11a °वस्तु° W. E. Wh. Bu.—°र्वाजि-नीवसू W. °वीजिनीवसु E.—कामाँ MSS. and H. कामा Rv. X, 40, 12.—अयँसता Bu.

अयं नो देवस्सविता बृहस्पतिरिन्द्राग्नी मित्रावरुणा स्वस्तये ।
त्वष्टा विष्णुः प्रजया सँरराणः काम आयातं कामाय त्वा वि
मुञ्चतु ॥१२॥

सप्तमः खण्डः ॥७॥

शर्म वर्मदमा भरास्यै नार्यै उपस्तिरे ।
सिनीवालि प्र जायतामियं भगस्य सुमतावसत् ॥१॥
गृहान्भद्रान्त्सुमनसः प्र पद्येऽवीरघ्नी वीरवतस्सुवीरान् ।
इरां वहंतो घृतमुक्षमाणास्तेष्वहँ सुमनास्सं विशामि ॥२॥
आगन्गोष्ठं महिषी गोभिरश्वैरायुष्मत्पत्नी प्रजया स्वर्वित् ।
बह्वीं प्रजां जनयंती सुरत्नेममग्निँ शतहिमास्सपर्यात् ॥३॥
अयमग्निर्गृहपतिस्सुसँसत्पुष्टिवर्धनः ।
यथा भगस्याभ्यां ददद्रयिं पुष्टिमथो प्रजाम् ॥४॥
प्रजाया आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम् ।

12b सप्तमः खण्डः ॥ Wh. ॥७॥ Bu. ॥७॥ सत्येन ता मंन्दसाने(ने E.)कान्नविँशतिरिकान्नविँशतिः ॥७॥ E. W. B. I, 8, 1a भरा° Wh. Hw. हरा° B. E. W. Bu. Hbd. Hbg. HHg. P. T.—उपस्तिरे W. Bu. Hbd. P. T. 1b गायता° E. P.—सुमता असत् B. E. W. P.—See Av. XIV, 2, 21. 2b वाहंतो B. वहंन्तो E.—°सुक्षमाणाः MSS. and H, See Introd., p. xvii. 3a °रायुष्मत्पत्नी E. °रायुष्मत्पत्नी B. 3b जनयंती E. B. T. जनयन्तीं Bu. 4b दधद्रयिं B. E. W. P.—पुष्टि° E. W. पुष्टि° B. पुष्टि° by conjecture. 5a प्रजया B pr. m. Bu.

NATIONAL ARCHIVES OF INDIA

यथैनयोर्न प्रमीयाता उभयोर्जीवतोः प्रजा ॥५॥
तेन भूतेन हविषायमा यायतां पुनः ।
जायां यामस्मा आवाक्षुस्ताँ रसेनाभि वर्धताम् ॥६॥
अभि वर्धतां पयसाभि राष्ट्रेण वर्धताम् ।
रय्या सहस्रपोषसेमौ स्तामनपेक्षितौ ॥७॥
इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीळन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥८॥
ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पतिः ।
मया पत्या प्रजावती सं जीव शरदश्शतम् ॥९॥
त्वष्टा जायामजनयत्त्वष्टास्यै त्वां पतिम् ।
त्वष्टा सहस्रमायूँषि दीर्घमायुः कृणोतु वाम् ॥१०॥
इमं मे वरुण ॥११॥
तत्त्वा यामि ॥१२॥

5 b यथै° W sec. m. Bu.—प्रमीयतामु° B.—प्रजाः B. E. W. Bu. P. T. 6 Av. VI, 78, 1. 7 b रय्या B. रेय्या W.—स्ताम° W. P. स्ताम° E. स्ताम° B.—°नपेक्षितौ MSS. and H. °नुपक्षितौ Av. VI, 78, 2. See Introd., p. xvii. 8 a वि यौष्टं Wh. Bu. Hw. HHg. T. वि यौष्टं W. = Rv. X, 85, 42; Av. XIV, 1, 22. व्यौष्टं B. E. व्योष्टं P. मा व्योष्टं मा विथोष्टं Hbg. मा व्यौष्टं मा विथोष्टं Hbd. See Whitney, Sanskrit Grammar, §§ 887 a, 894 b. 8 b इन्द्रं B. E. W sec. m. इन्द्रं W pr. m. Haradatta explains इन्द्रः. Cf. Rv. VI, 57, 6, and see Introd., p. xxix seq. 9 Cf. Av. XIV, 1, 52. 10 Av. VI, 78, 3. 11–15 = I, 4, 12–16.

NATIONAL ARCHIVES OF INDIA

त्वं नो अग्ने ॥१३॥
स त्वं नो अग्ने ॥१४॥
त्वमग्ने अयासि ॥१५॥

अष्टमः खण्डः ॥८॥

इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो रायस्पोषो नि षीदतु ॥१॥
सोमेनादित्या बलिनस्सोमेन पृथिवी दृढा ।
अथो नक्षत्राणामेषामुपस्थे सोम आहितः ॥२॥
प्रस्त्वं स्थः प्रेयं प्रजया भुवने शोचेष्ट ॥३॥
इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ सं सृजस्वाधा जीवीं विदथमा वदासि ॥४॥
सुमङ्गलीरियं वधूरिमाँ समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं वि परेतन ॥५॥
ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवतं स्थितम् ।

15 अष्टमः खण्डः ॥ Wh. ॥८॥ Bu. ॥८॥ शर्म वर्मैकविँशतिः ॥८॥ E. W. B. I, 9, 1a श्वा इह E. — पुरुषाः Bu. P. — See Av. XX, 127, 12, and Introd., p. xvii seq. 1b षीदति P. 2 See Rv. X, 85, 2. 3 प्रस्वस्थः B. E. प्रस्वस्थ W. प्रस्वस्थः Bu. Wh. P. T. प्रस्त्वः स्थः H. See Introd., p. xviii seq.—प्रेयं E. 4 See Rv. X, 85, 27. 5a संमेत W. 5b परेतना Bu.—Rv. X, 85, 33. 6a ध्रुवतंस्थितं B.

NATIONAL ARCHIVES OF INDIA

त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः ॥ ६॥
सप्तर्षयः प्रथमां कृत्तिकानामरुन्धतीं यज्ञवतां ह निन्युः ।
षट् कृत्तिका मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टमी ॥ ७॥
सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम् ॥ ८॥
उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम ।
पशूँश्च मह्यमा वह जीवनं च दिशो दिश ॥ ९॥
मा नो हिँसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आ गहि श्रिया मा परि पातय ॥ १०॥

नवमः खण्डः ॥ ९॥

6b मेथ्यसि B.P. मेध्यसि मेधी Hbg. मेधि । असि मेधी Hbd. मेधसि E.T. मेध्यसि W. मेद्यसि Wh. Bu. मेद्यसि मेधी Hw. See I, 1, 10. 7a सप्तर्षयः W. सप्तर्षयः E. सप्त ऋषयः B. P. T. सप्तर्षयः Wh. Bu.—°मरुन्धती W. Bu.—यज्ञु° B pr. m. W.E.Bu.P. ये ज्ञु° Hir. I, 22, 14. Bhār. I, 18. Baudh. I, 8.—नन्युः Bu. P. 7b षट् कृत्तिका मुख्ययोगं वहन्तियम° E. षड्कृतिका मुख्ययोगं वहंतीयम° W. षट् कृति-(त्ति sec. m.) का मुख्ययोगं वहंतीयम° B. Haradatta supports the reading adopted in our text. But it is not impossible that the original reading was षट्कृत्तिकामुख्ययोगं वहन्तीयम°. Baudh. I, 8 has षट् कृत्तिकानां मुख्ययोगं वहतीयमस्माकमेधत्वष्टमी खरुन्धती. Bhār. I, 18 agrees with Hir. I, 22, 14. 8b सनिं B. Rv. I, 18, 6. सनिं W. E. TĀ. X, 1, 4. 9a ममा Bu. 9b दिशो दिशा Bu. 10b पातया Bu.—Mantras 8–10 occur TĀ. X, 1, 4 seq.—नवमः खण्डः Wh. ॥ ९॥ Bu. ॥ ९॥ इह गाव एकान्नविँशतिः ॥ ९॥ W. E. B.

NATIONAL ARCHIVES OF INDIA

उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा ।
अन्यामिच्छ प्रभर्व्यं१ सं जायां पत्या सृज ॥१॥
उदीर्ष्वातः पतिवति ह्येषा विश्वावसुं नमसा गीर्भिरीट्टे ।
अन्यामिच्छ पितृषदं व्रिताँ स ते भागो जनुषा तस्यं विद्धि ॥२॥

अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्र पद्ये यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा ॥३॥

वायो प्रायश्चित्ते ---- ॥४॥

आदित्य प्रायश्चित्ते ---- ॥५॥

प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्र पद्ये यास्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा ॥६॥

I, 10, 1b प्रभर्व्यं Wh. Hw. प्रभर्व्यं Baudh. I, 10. प्रपर्व्यं B sec. m. W. E. Hbg. Hbd. T. Rv. X, 85, 22. प्रपर्व्यं B pr. m. प्रपर्व्यं Bu.—सृजा Bu. 2a पतिवति ह्येषा B. Wh. H. T. पतिवती ह्येषा E. P. पतिवतीह्येषा W. पतिवतीः ह्येषा Bu.—विश्वावसुं नमसा E pr. m. °वसुन्नमसा Wh. Hw sec. m. °वसून्नमसा Bu. °वसुर्नमसा E sec. m. W. B. °वसुर्न्नमसा Hw pr. m. विश्वावसुं त्वां नमसा Hbd. विश्वावसु त्वां न° Hbg. °वसुन्त्वा न° HHg. The difference between न्न and र्न is very slight in Grantha.—°रीट्टे MSS. and H. See Introd., p. xix. 2b °षदं वित्तां Wh. Hw. °षदं व्रतां E. W. Rv. X, 85, 21. °षदं व्रतां B. °षदं व्रात्तां Bu. Hbd. Hbg. HHg. P. T. 3 लक्ष्मघ्नी W. T. लक्ष्म्यघ्नी P. 4–5 वायो प्रायश्चित्त आदित्य (आदित्य E.) प्रायश्चित्ते MSS. मध्यमयोश्च त्वं देवानामित्यनुषङ्गः H. 6 लक्ष्मघ्नी W.—Abridged in Bu. to प्रजापते प्रायश्चित्ते त्वं देवानां + हा.

NATIONAL ARCHIVES OF INDIA

प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चा-
न्तरिक्षं च सिन्धुश्च समुद्रश्च सरस्वाँश्च विश्वव्यचाश्च ते यं द्विष्मो
यश्च नो द्वेष्टि तमेषां जम्भे दध्म स्वाहा ॥७॥

मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च
सहश्च सहस्यश्च तपश्च तपस्यश्च ते यं द्विष्मोऽयश्च नो द्वेष्टि तमेषां
जम्भे दध्म स्वाहा ॥८॥

चित्तं च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च विज्ञातं च
विज्ञानं च नामं च क्रतुश्च दर्शश्च पूर्णमासश्च ते यं द्विष्मो यश्च
नो द्वेष्टि तमेषां जम्भे दध्म स्वाहा ॥९॥

भूः स्वाहा भुवः स्वाहा सुवः स्वाहौँ स्वाहा ॥१०॥११॥१२॥१३॥

दशमः खण्डः ॥१०॥

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् ।

7 °श्च काटश्चा° E. W.—धर्णसश्च Wh.—समुद्रश्च E.—°श्चाँश्च W. P.—दध्म W. P. T. दध्नः B pr. m. दध्मः B sec. m. दद्म Wh. Bu.—Cf. Maitr. S. III, 12, 12. 8 दध्नः B pr. m. दुध्मः B sec. m. दद्म Wh. दध्म P. T. ते यं+हा, abridged, in Bu.—See Ts. I, 4, 14. 9 °श्चाकूतं चाकूतिश्च Wh. Hw.—°श्च ॥ धीतं चाधितिश्च E. आधीतं चाधीतिश्च omitted in Wh. See Ts. III, 4, 4, 1.—दद्म Wh. दध्म P. T. दध्नः B. ते यं+हा, abridged, in Bu. 10 भूस्वाहा E. 11 भुवस्वाहा Wh. Bu. 12-13 सुवसाहौँ स्वाहा E. सुवस्वाहीं स्वाहा Wh. P. सुवस्वाहा हीं स्वाहा Bu.—दशमः खण्डः ॥ Wh. ॥१०॥ Bu. ॥ उदीर्ष्वातः पञ्चदश ॥१०॥ E. ॥ उदीर्ष्वातः पंच ॥१५॥ W. ॥१०॥ उदीर्ष्वातो दश ॥१०॥ B. I, 11, 1 Rv. X, 183, 1.

NATIONAL ARCHIVES OF INDIA

इह प्रजामिह रयिँ ररा॑णः प्र जा॑यस्व प्रजया॑ पुचकाम ॥१॥
अप॑श्यं त्वा॒ मन॑सा॒ दीध्या॑नाँ स्वायाँ त॒नूँ ऋत्वि॑ये॒ नाध॑मानाम् ।
उप॒ मामु॒च्चा यु॑व॒तिर्भू॑या॒ः प्र जा॑यस्व प्रजया॑ पुचकामे ॥२॥
सम॑ञ्जन्तु॒ विश्वे॑ देवास॒मापो॒ हृद॑यानि नौ ।
सं मा॑त॒रिश्वा॒ सं धा॒त्रा समु॑ देष्ट्री॑ दिदेष्टु नौ ॥३॥
प्रजा॑पते त॒न्वँ॑ मे जुषस्व॒ त्वष्टर्दे॒वेभि॑स्सहसाम इन्द्र ।
विश्वै॑र्दे॒वै रा॑तिभि॑स्सँर॒रा॑णः पुँसां ब॑हू॒नां मा॑त॒र॑ स्याम ॥४॥
आ नः॑ प्र॒जां ज॑नयतु प्र॒जाप॑तिराज॒रसा॑य॒ सम॑नक्त्व॒र्यमा ।
अदु॑र्मङ्गलीः पतिलो॒कमा वि॑श॒ शं नो॑ एधि द्वि॒पदे॒ शं चतु॑ष्पदे ॥५॥
तां पू॑षञ्छि॒वत॑मामेरयस्व॒ यस्यां॑ बी॒जं म॑नु॒ष्या३ वप॑न्ति ।
या॑ नः॑ ऊरू॒ उश॑ती वि॒श्रया॑ति॒ यस्यामु॒शन्तः॑ प्रह॒रेम॒ शेप॑म् ॥६॥

2a तनूँ B. E. Wh. Bu. H. तनुँ W. तनु P. तनू Rv. X, 183, 2. तनूर्त्विये T. See Introd., p. xix.—ऋत्विये E. W. ऋत्वे Wh. Hw.—नाधमानां B. E. W. P. T. Rv. l. c. In Bu. ध् and थ् not distinguishable, see I, 1, 10 note. 2b उपमामु° E.—°र्वभूया॑ः Wh. उप वभूया॑ः अनुभूया॑ः Hw. उपभूया॑ः अनुभूया॑ः Hbd. Hbg. 3b दिदेष्टु Wh. Bu. H. T. दिदेष्टि E. W. B. दधातु Rv. X, 85, 47. 4a त्वष्टु° E. W. P.—सह साम B. E. W. सहसाम H. See Introd., p. xx. 4b °वैर्रातिभिः W sec. m. °वैररातिभिः B. T. °वैररा° or °वैर्रा° Wh.—बङ्गनां W. बङ्गलानां E. 5b शं नो भव B. E. Rv. X, 85, 43. 6a °मैरयस्व Wh. Hw. 6b विश्रयाते Wh. Bu. T. H. Hir. I, 20, 2. विस्रयाति E. B. विम्रयाति W sec. m. Rv. X, 85, 37. विम्रते P. विम्रयाति Av. XIV, 2, 38. विम्रयता probably W pr. m. विम्रयाते Baudh. I, 12. See Introd., p. xvi.—प्रहरेम Wh. Bu. T. H. Hir. l. c. प्रहरेम B. E. W. P. Rv. l. c.—In all the MSS. of the text except Wh., the 11th Khaṇḍa ends here: ॥ ११ ॥ Bu. ॥ ११ ॥

NATIONAL ARCHIVES OF INDIA

आ रोहोरुमुप बर्हस्व बाहुं परि ष्वजस्व जायाँ सुमनस्यमानः ।
तस्यां पुषतं मिथुनौ सयोनी बह्वीं प्रजां जनयन्तौ सरेतसा ॥७॥
आर्द्रयारण्या यचामन्थत्पुरुषं पुरुषेण शक्रः ।
तदेतौ मिथुनौ सयोनी प्रजयामृतेनेह गच्छतम् ॥८॥
अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वप्तः ।
अहं प्रजा अजनयं पितॄणामहं जनिभ्यो अपरीषु पुत्रान् ॥९॥
पुनिणेमा कुमारिणा विश्वमायुर्व्यश्नुतम् ।
उभा हिरण्यपेशसा ॥१०॥
वीतिहोत्रा कृतद्वसू दशस्यन्त्वामृताय कम् ।
शमूधो रोमशँ हंयो देवेषु कृणुतो दुवः ॥११॥

एकादशः खण्डः ॥११॥

अपश्यं त्वा द्वादशा ॥११॥ B. अपश्यं त्वा द्वादश ॥११॥ E. ॥११॥ अपश्यं त्वा द्वादश ॥१२॥ W. In T. also vv. 7–11 form a separate Khaṇḍa. But see Introd., p. xxxiii. 7a See Av. XIV, 2, 39. 7b पुषतं मिथुनौ W.—सरेतसा Wh. Bu. Hw. HHg. T. सरेतसा सरेतसौ Hbd. Hbg. सरेतसौ B. E. W. 9a गर्भमदधा° W. 9b अजनयं पितृ° W. T. अजनयं पितृ° B. अनयन्पितृ° E. अनयन्पितृ° corrected to अजनयन्पितृ° Wh. अजनयत् पितृ° Bu. पितॄणां --- अजनयम् जनयामि Hw. HHg. पितॄणां --- अजनयन् जनयामि Hbd. पितॄणां --- अजनयं जनयामि Hbg. अजनयं पृथिव्या° Rv. X, 183, 3.—जनिभ्यो Wh. Bu. T. H. Rv. l. c. जरिभ्यो B. W. जरीभ्यो E. 10a पुनिणेमा and °व्यश्नुतम् MSS. and H. See Rv. VIII, 31, 8. 11a दशस्वन्त्वा° E. W. दशस्वंत्वा° B. दशस्वन्त्वा° Wh. Bu. H. See Rv. VIII, 31, 9, and Introd., p. xx. 11b शमू° MSS. and H.—हंयो W. E. Wh. Bu. H. हंतो B. Rv. l. c.—कृणुतो W. कृणुतो B.—एकादशः खण्डः Wh. ॥१२॥ Bu. ॥१२॥ आ रोहोरुं नव ॥१२॥ W. E. B.

NATIONAL ARCHIVES OF INDIA

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिँशतु ।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥१॥
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा ॥२॥
हिरण्ययी अरणी यं निर्मन्थतो अश्विना ।
तं ते गर्भं हवामहे दशमे मासि सूतवे ॥३॥
यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे ।
एवं त्वं गर्भमा धत्स्व दशमे मासि सूतवे ॥४॥
यथा पृथिव्यग्निर्गर्भो द्यौर्यथेन्द्रेण गर्भिणी ।
वायुर्यथा दिशां गर्भ एवं गर्भं दधातु ते ॥५॥
विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् ।
पुमाँसं गर्भमा धेहि दशमे मासि सूतवे ॥६॥
नेजमेष परा पत सुपुत्रः पुनरा पत ।

I, 12, 2b पुष्करस्रजौ Bu.—Mantras 1–3 = Rv. X, 184. 4a तिष्ठंती गर्भमाद्धे (without accents) B.—See Rv. Khila 30, 2; Av. V, 25, 2; VI, 17, 1. 4b एवन्तं Bu. एवं तं W. P. एवं तं E. Rv. l. c. 5b दधामि Bu. Hw. HHg. T. Hir. I, 25, 1. See Bṛh. Up. VI, 4, 21. 6a विष्णो W. B sec. m. Wh. Bu. T. P. विष्णोः B pr. m. E. Rv. Khila 30, 3. In the Grantha MSS. Visarga before a sibilant with a following consonant is, as a rule, dropped, hence there is no difference in writing the vocative विष्णो and the genitive विष्णोः in our case. Haradatta explains it as a vocative: हे विष्णो. See also Av. V, 25, 10–13.—गवीन्यां E. W. 6b धत्स्व P. 7a नेजमेष Bu.—सपुत्रः Wh. W. Hbg. T.—पता Bu.—See Rv. Khila 30, 1.

NATIONAL ARCHIVES OF INDIA

अस्यै मे पुचक्कामायै गर्भमा धेहि यः पुमान् ॥७॥
व्यस्य योनिं प्रति रेतो गृहाण पुमान्पुचो धीयतां गर्भो अन्तः ।
तं माता दश मासो बिभर्तु स जायतां वीरतम स्वानाम् ॥८॥
आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम् ।
आ वीरो जायतां पुचस्ते दशमास्यः ॥९॥

द्वादशः खण्डः ॥१२॥

करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते ।
अनूनः पूर्णो जायतामष्टोणोऽपिशाचधीतः ॥१॥
पुमाँस्ते पुचो नारि तं पुमाननु जायताम् ।
तानि भद्राणि बीजान्यृषभा जनयन्तु नौ ॥२॥
यानि भद्राणि बीजान्यृषभा जनयन्ति नः ।
तैस्त्वं पुचान्विन्दस्व सा प्रसूर्धेनुका भव ॥३॥

7b मे B. E. W. 8a योनिं पतिरितो गृहाण E. W. P. योनिं पतिरितो गृहाण B. योनिं प्रति रेतो गृहाण Wh. Bu. T. H. See Hir. I, 25, 1; Śāṅkh. I, 19, 6.—गर्भे E. Bu. T. 8b दशमासो W. E.—बिभर्ति B. E. T. P.—वीरवतः E. 9a पुमाम्बाण इवे° E. W. Av. III, 23, 2. 9b वीरो MSS. वीरोऽच Av. l. c. Hir. l. c. Śāṅkh. l. c.—द्वादशः खण्डः ॥ Wh. ॥१३॥ B. W. E. Bu. I, 13, 1a See Av. III, 23, 5a. 1b जायतां° E. जायताम° W.—°ओणो W. °सोणो Bu.—°धीतः Bu. 2a See Av. III, 23, 3a.—नारि तं E. नारितं W. 2b यानि E.—जनयन्ति नः E. See Av. III, 23, 4a. 3a तानि E.—जनयन्ति नः, the accents by correction. जनयन्ति नौ E. जनयन्ति नः W. जनयंति नः B. जनयन्ति च Av. III, 23, 4. 3b °धेनुका भव B. E. W. °धेनुका भव Av. l. c.

NATIONAL ARCHIVES OF INDIA

कामप्रमृध्यतां मह्यमपराजितमेव मे ।
यं कामं कामये देव तं मे वायो समर्धय ॥४॥
अनुहवं परिहवं परीवादं परिक्षपम् ।
दुस्वप्नं दुरुदितं तद्विषज्जो दिशाम्यहम् ॥५॥
अनुहूतं परिहूतँ शकुनैर्यदशाकुनम् ।
मृगस्य सृतमक्ष्णया तद्विषज्जो दिशाम्यहम् ॥६॥
आरात्ते अग्निरस्वारात्परशुरस्तु ते ।
निवाते त्वाभि वर्षतु स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु
वनस्पते ॥७॥
नमश्शकृत्सदे रुद्राय नमो रुद्राय शकृत्सदे ।
गोष्ठमसि नमस्ते अस्तु मा मा हिँसीः ॥८॥
सिगसि नसि वज्रो नमस्ते अस्तु मा मा हिँसीः ॥९॥

4a कामप्रमृद्ध्यतां Wh. T. H. कामप्रमृंध्यतां B pr. m. कामः प्रमुंध्यतां B sec. m. कामः समृंध्यतां E. W. कामस्समृद्ध्यतां Bu. 4b यं कामं E. — समर्द्धया Bu. 5a परीवादं Wh. Hw. Hbd. T. P. परिवादं B. E. W. Hbg. HHg. Av. XIX, 8, 4a.— परिक्षपं Bu. H. T. P. परिक्षिपं E. B. परिक्षिमं W. परिक्षवम् Wh. Av. l.c. 6a अनूहूतं Bu.—पुरुहूतँ B.—शकुनैर्यदशाकुनं B. शकुनैर्यदशाकुनं W. शकुनैर्यद-शाकुनं E. शकुनैर्श्यद° Bu. शकुनैर्श्यद° Wh. 6b स्रुतमक्ष्णया E. Hbd. Hbg. HHg. P. (In Hw. the commentary on this verse is missing.) श्रुतमक्ष्णया W. स्रुत° T. सृतमक्ष्णया B. स्रुगमक्ष्णया Bu. Wh. See Hir. I, 16, 17. 9 शिर्गसि W. सुर्गसि B.—नसि (for नासि H.) MSS., also Hir. I, 16, 3. See Pār. III, 15, 17, and Introd., p. xxvii.

NATIONAL ARCHIVES OF INDIA

उन्नतेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शँससि ।
स्वस्ति नश्शकुने अस्तु प्रति नस्सुमना भव ॥१०॥

त्रयोदशः खण्डः ॥१३॥

प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रं हुवेम ॥१॥
प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥२॥
भग प्रणेतर्भग सत्यराधो भगेमां धियमुदव ददन्नः ।
भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्त स्याम ॥३॥
उतेदानीं भगवन्त स्यामोत प्रपित्व उत मध्ये अह्नाम् ।
उतोदिता मघवन्त्सूर्यस्य वयं देवानाँ सुमतौ स्याम ॥४॥
भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्त स्याम ।
तं त्वा भग सर्व इज्जोहवीमि स नो भग पुरएता भवेह ॥५॥

10a उन्नतेव शकुने E. उन्नतेव शकुने W. See Rv. II, 43, 2a. 10b शकुने E. W.—त्रयोदशः खण्डः Wh. ॥१४॥ Bu. ॥१४॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ आदधामि ते पृथिवीं पृथिव्या मुखेन मुखं संसृजामि पृथिव्या । अपानेनापानं संसृजामि पृथिव्या स्योनेन स्योनं संसृजामि ॥ आदधामि ते द्यां द्यवा मुखेन मुखं संसृजामि दिवा । व्यानेन व्यानं संसृजामि दिवा स्योनेन स्योनं संसृजामि ॥ आदधामि ते वायुं वायोर्मुखेन मुखं संसृजामि वायुना । प्राणेन प्राणं संसृजामि वायुना स्योनेन स्योनं संसृजामि ॥ आदधामि ते सोमं सोमस्य मुखेन मुखं संसृजामि सोमेन । रेतसा रेतः संसृजामि सोमेन स्योनेन स्योनं संसृजामि ॥ आदधामि ते पृथिवीं पृथिव्या मुखेन मुखं संसृजामि पृथिव्या । अपानेनापानं संसृजामि पृथिव्या स्योनेन स्योनं संसृजामि ॥ आदधामि ते द्यां द्यवा मुखेन मुखं संसृजामि दिवा । व्यानेन व्यानं संसृजामि दिवा स्योनेन स्योनं संसृजामि ॥ आदधामि ते वायुं वायोर्मुखेन मुखं संसृजामि वायुना । प्राणेन प्राणं संसृजामि वायुना स्योनेन स्योनं संसृजामि ॥ आदधामि ते सोमं सोमस्य मुखेन मुखं संसृजामि सोमेन । रेतसा रेतः संसृजामि सोमेन स्योनेन स्योनं संसृजामि ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥ गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ हिरण्यस्रजौ देवावाधत्तां पुष्करस्रजौ

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥६॥
अश्वावतीर्गोमतीर्न उषासो वीरवतीस्सदमुच्छन्तु भद्राः ।
घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः ॥७॥

चतुर्दशः खण्डः ॥१४॥

इमां खनाम्योषधीं वीरुधं बलवत्तमाम् ।
यया सपत्नीं बाधते यया संविन्दते पतिम् ॥१॥
उत्तानपर्णे सुभगे सहमाने सहस्वति ।
सपत्नीं मे परा धम पतिं मे केवलं कृधि ॥२॥
उत्तराहमुत्तर उत्तरेदुत्तराभ्यः ।
अथा सपत्नी या ममाधरा साधराभ्यः ॥३॥
नह्यस्ये नाम गृभ्णामि नो अस्मिन्रमते जने ।
परामेव परावतं सपत्नीं नाशयामसि ॥४॥

6a नमन्ता Bu. 7b प्रपीना B.W.Wh. Bu. T. H. TBr. II, 8, 9, 9. प्रपीता E. P. Rv. VII, 41, 7.—चतुर्दशः खण्डः ॥ Wh. ॥१५॥ Bu. ॥१५॥ प्रातरग्निं चतुर्दश ॥१५॥ E.W. B. I, 15 This Khaṇḍa corresponds to Rv. X, 145. 1a °म्योषधीं B.W.Wh. Hw.Hbd.Hbg. HHg. T. P. °म्योषधिं E.Bu. Rv.X, 145, 1. In the Grantha MSS., however, especially in Bu., it is often impossible to distinguish the long i from the short i. 2 उत्तानपर्णे E. W. — Rv. has देवजूते (so also P.) for सहमाने and कृद्ध for कृधि. 4a नह्यस्ये B. न ह्यस्ये E.W. न व्यस्ये Bu. नह्यस्ये Wh. H. T. नह्यस्या P. Rv.— गृभ्णामि W. गृह्णामि Wh. 4b Rv. has गमयामसि for नाशयामसि.

NATIONAL ARCHIVES OF INDIA

अहमस्मि सहमानाथ त्वमसि सासहिः ।
उभे सहस्वती भूत्वा सपत्नीं मे सहावहै ॥५॥
उपं तेऽधाँ सहमानामभि त्वाधाँ सहीयसा ।
मामनु प्र ते मनो वत्सं गौरिव धावतु पथा वारिव धावतु ॥६॥

पञ्चदशः खण्डः ॥१५॥

उदसौ सूर्यो अगादुदयं मामको भगः ।
अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः ॥१॥
अहं केतुरहं मूर्धा अहमुग्रा विवाचनी ।
ममेदनु क्रतुं पतिस्सेहानायां उवाचरेत् ॥२॥
मम पुत्राश्शत्रुहणोऽथो मे दुहिता विराट् ।
उताहमस्मि संजया पत्युर्मे श्लोक उत्तमः ॥३॥
येनेन्द्रो हविषा कृत्यभवद्द्युत्तमः ।

5b भूत्वा MSS. भूत्वी P. Rv. 6b धावत् (*bis*) T.—पञ्चदशः खण्डः Wh. ॥१६॥ W in marg. E. B. Bu. I, 16 This Khaṇḍa corresponds to Rv. X, 159. 1b तद्विद्वला E. तद्विवला Bu. W. has तद्वि(एतद्वि° pr. m.)द्वलापतिमभ्यसाचि विषासहिः, placing, by mistake, these words after वारिव धावतु in I, 15, 6. 2a मूर्धा अहमुग्रा B.W. मूर्द्धा अहमुग्रा E. मूर्द्धाहमुग्रा Wh. Bu. P. Rv. मूर्द्धाऽह° T. 2b ममेदनु W. ममैतदनु Wh. ममेत् (corrected to ममेतत्) ममेव Hbd. ममैतत् (by correction) ममेव Hbg. ममैतत् Hw.—उवाचरेत् MSS. and H. for उपाचरेत् P. Rv., see Introd., p. xxi. 3b उताहमस्मि संजया पत्युर्मे श्लोक W.—पत्युः MSS. and H. for पत्यौ P. Rv. 4a कृत्य(त्य्य B sec. m.)भवद्द्यु° B. Wh. Bu. T. H. कृत्यंभवद्द्यु° W. कृत्यभवद्द्यु° E. कृत्यभवद्युग्द्यु° Rv. कृत्यभवद्युग्द्यु° P.

NATIONAL ARCHIVES OF INDIA

अहं तदक्रि देवा असपत्ना किलाभवम् ॥४॥
असपत्ना संपत्निघ्नी जयन्त्यभिभूवरी ।
आविंत्सि सर्वासाँ राधो वर्चो अस्थेयसामिव ॥५॥
समजैषमिमा अहँ सपत्नीरभिभूवरीः ।
यथाहमस्य वीरस्य विराजामि धनस्य च ॥६॥

षोडशः खण्डः ॥१६॥

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि ।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ॥१॥
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्योऽनूक्यात् ।

4b तदक्रिर्देवासपत्ना Wh. Hw. The corrupt readings of Hbd. (तद्वविरिति करोति), Hbg. (तद्वविरक्ति करोति), and HHg. (नद्वरविरकि) point to तदक्रि. Hbd. Hbg. HHg. also have हे देवाः. See Introd., p. xxii.—°भवं B. W. Wh. Bu. H. °भुवं E. T. Rv. °भुवन् P. 5a संपत्निघ्नी MSS. and H. संपत्नघ्नो P. Rv.—जनक्ष्य° Bu.—°भूवरीः B pr. m. W. T. P. 5b आविंत्सि सर्वासाँ (सर्वीसाँ W.) राधो वर्चो B. W. Wh. Bu. H. P. T. आवृंधमन्यासां वर्चो राधो Rv.—अस्थेय° W.—In E. 5b and 6a are missing. 6a °भिभूवरीः MSS. and H. for °भिभूवरी, see Introd., p. xxii. 6b °मस्य B sec. m. W.—वरस्य वीरा° B.—विराजामि धनस्य च MSS. विराजानि जनस्य च Rv. P.—षोडशः खण्डः ॥ Wh. ॥१७॥ Bu. ॥१७॥ इमां खनाम्युदुम्बरीं सूयों द्वादश द्वादश ॥१७॥ E. W. B. I, 17, 1-6 correspond to Rv. X, 163. See also Rv.-MS., fol. 10. 1a चुबुका° B. E. Bu. चुबुका° W. चिबुका° Wh. कुबुका° Rv. The word is not repeated by Haradatta. 1b-6b Bu. reads पृहामि for वृहामि. 2a °भ्योनूक्यात् W. B. Wh. Bu. T. °भ्यो अनूक्यात् E. Rv.

NATIONAL ARCHIVES OF INDIA

यक्ष्मं दोषण्यं१मँसाभ्यां बाहुभ्यां वि वृहामि ते ॥२॥
आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर्हृदयादधि ।
यक्ष्मं मतस्नाभ्यां यकृः प्लाशिभ्यो वि वृहामि ते ॥३॥
ऊरुभ्यां तेऽष्ठीवद्भ्यां जङ्घाभ्यां प्रपदाभ्याम् ।
यक्ष्मँ श्रोणीभ्यां भासदाङ्ँससो वि वृहामि ते ॥४॥
मेहनादलंकरणात्सोमभ्यस्ते नखेभ्यः ।
यक्ष्मँ सर्वस्मादात्मनस्तमिमं वि वृहामि ते ॥५॥
अङ्गादङ्गात्सोमोलोमो जातं पर्वणिपर्वणि ।
यक्ष्मँ सर्वस्मादात्मनस्तमिमं वि वृहामि ते ॥६॥
परा देहि शबल्यँ ब्रह्मभ्यो वि भजा वसु ।
कृत्यैषा पद्वती भूत्वा जाया विंशते पतिम् ॥७॥
अष्ठीला तनूर्भवति रुशती पापयामुया ।
पतिर्यद्ध्वै३ वाससा स्वमङ्गमभिधित्सति ॥८॥

4a तेष्ठीवद्भ्यां B. Wh. Bu. P. ते अष्ठी° E. W. Rv.—जंघाभ्यां W. B. Wh. Bu. H. जघाभ्यां E. पार्ष्णिभ्यां Rv. 4b श्रोणीभ्यां B. Wh. T. H. श्रोणीभ्यां W. श्रोणिभ्यां E. Rv. In Bu. it may be read श्रोणि° or श्रोणी°.—भासदाध्वँससो E. P. भासदाङ्ँससो W. मासदाध्वँससो B. भासदाङ्ससो Bu. Wh. H. भासदाङ्गंससो Rv.—In B. verse 4 precedes verse 3. 5a °द्वलंकर° MSS. and H. °द्वनंकर° Rv. 5b and 6b °स्तमिमं B. W. Wh. Bu. T. H. °स्तमिदं E. Rv. 7a शावच्चं Wh. Bu. T. H. शावुच्चं B. E. शावुच्चं W. शामुच्चं Rv. X, 85, 29. 7b भूत्वा MSS. भूत्या Rv. l.c. 8a अष्ठीला MSS. अश्रीरा Rv. X, 85, 30.—तनूर्भव Wh. Bu. 8b °द्वध्वै MSS. वध्वै वध्वाः H. °द्वध्वो३ Rv. l. c.—°धित्सति E. B. Wh. Bu. H. °चित्सति W.

NATIONAL ARCHIVES OF INDIA

क्रूरमेतत्कटुकमेतदप्राष्टवद्विषवन्नैतदत्तवे ।
सूर्यो यः प्रत्यक्षं विद्यात्स एतत्प्रति गृह्णीयात् ॥९॥
आशसनं विशसनमथो अधिविचर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शँसति ॥१०॥

सप्तदशः खण्डः ॥१७॥

अचीभ्यां ते ॥ उदसौ ॥ इमां खनामि ॥ प्रातरग्निम् ॥ करोमि ते ॥ विष्णुर्योनिम् ॥ अपश्यं त्वा ॥ उदीर्ष्वातः ॥ इह गावः ॥ शर्म वर्म ॥ यदृते चित् ॥ सत्येन ॥ आ तिष्ठमम् ॥ सोमाय ॥ सोमः प्रथमः ॥ हिरण्यवर्णाः ॥[1] प्र सु गमन्ता ॥ ताणि ब्रह्मोत शँसति ॥[2]

॥ इति प्रथमः प्रश्नस्समाप्तः ॥[3]

°धित्संते Rv. l. c. 9a °पाष्टु° B.—°त्तवे Bu. Hw. 9b विद्यात्स E.—Cf. Rv. X, 85, 34. 10a °विचर्त्तनम् Wh. Bu. H. °विवर्तनं B. W. °विकर्त्तनं E. Rv. X, 85, 35. Haradatta seems to explain °थो अधि विचर्तनं. 10b ब्रह्मोत शँसति B. E. Wh. H. ब्रह्मोथ शँ° W. ब्रह्मोद शं° Bu. ब्रह्मा तु शुंधति Rv. l. c.— सप्तदशः खण्डः Wh. ॥१८॥ अचीभ्यां ते विँशृतिः ॥१८॥ E. W. B. ॥१८॥ अची ग्रीवा आन्त्रि ऊरू मेहनादंगादंगात्परा देहि सप्त ॥ Bu. T. [1] So according to Wh., except that इह गावः is left out. In E. this list of Khaṇḍa beginnings is omitted. B. W. Bu. have अचीभ्यां ते नासिकाभ्यां ॥ उदसौ सूर्यो अगात् (सूर्योगात् Bu.) ॥ इमां खनाम्योषधीं (°खनांभ्योष° W. °खनांभ्योष° B pr. m. °खनांम्योष° B sec. m.) ॥ प्रातरग्निं ॥ करोमि ते प्राजापत्यं ॥ विष्णुर्योनिं कल्पयतु ॥ आ रोहोरुं (रोरुवं Bu.) ॥ अपश्यं त्वा मनसा चेकितानं (W. has only अपश्यं त्वा) ॥ उदीर्ष्वातो विश्वावसो ॥ इह गावः प्र जायध्वं ॥ शर्म वर्मेदमा हर ॥ ता मंदसाना मनुषो दुरोणे (Bu. has य ऋते चिदभिश्रिषः instead of it) ॥ सत्येनोत्तभिता भूमिः ॥ आ तिष्ठममरमानं ॥ सोमाय अग्निविदे स्वाहा ॥ सोमः प्रथमो विविदे (Bu. adds गन्धर्वः) ॥ हिरण्यवर्णाः शुचयः पावकाः ॥ [2] प्र सु गमंता

NATIONAL ARCHIVES OF INDIA

॥ श्रीगणेशाय नमः ॥ हरिः ओँ ॥

उष्णेन वायवुदकेनेह्यदितिः केशान्वपतु ॥१॥
आपं उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे।
ज्योक् सूर्यं दृशे ॥२॥
येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्।
तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथासद्यमसौ ॥३॥
येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत्।
तेनास्यायुषे वप सौश्लोक्याय स्वस्तये ॥४॥

धियसानस्य सुचयि W. प्र सु ग्मंता धियसानस्य सुचयिं ॥ ७ ॥ हरिः ओँ ॥ B. प्र सु ग्मन्ता धियसानस्य सचयिं। प्र सु ग्मन्ता सोमस्तवेन शर्म वर्म्मेदमुदीर्ष्वापश्चम्खारोहदं विष्णुर्व्रीणिं प्रातरग्निमिमां खनामचिभ्रामेकादशा ॥ प्र सु ग्मन्ता तानि ब्रह्मोत शंसति ॥ Bu. [3] इति मंचप्रश्ने प्रथमप्रश्नः समाप्तः B. इति श्रीमंचप्रश्ने कांडि प्रथमः प्रश्नः ॥ १ ॥ W. इति प्रथमपाठा समाप्तः ॥ E. Deest in Bu. Wh. As to T. see Introd., p. xiii.

II, 1, 1 See Av. VI, 68, 1; Pār. II, 1, 6; Āśv. I, 17, 6 seq.; MBr. I, 6, 1. 2a उदंतु B.—See Ts. I, 2, 1, 1; Av. VI, 68, 2; Śāṅkh. I, 28, 9; Pār. II, 1, 9; Āśv. I, 17, 7; MBr. I, 6, 2. 2b See Rv. I, 23, 21. 3b °संद्यमसौ E.—See TBr. II, 7, 17, 2; Av. VI, 68, 3; VIII, 5, 21b; Āśv. I, 17, 10. 4a चायुंविवपत् B.—Cf. MBr. I, 6, 7; Āśv. I, 17, 12.

NATIONAL ARCHIVES OF INDIA

येन॒ भूय॒श्चरा॑त्ययं॒ ज्योक्प॑श्यात्ति॒ सूर्य॑म् ।
तेना॒स्यायु॑षे॒ वप॒ सौ॒म्यौ॒क्याय॒ स्व॒स्तये ॥५॥
येन॑ पू॒षा बृ॒हस्पते॑र॒ग्नेरिन्द्र॑स्य॒ चायु॑षेऽवपत् ।
तेन॑ ते॒ वपाम्य॒सावायु॑षा॒ वर्च॑सा॒ यथा॒ ज्योक् सु॒मना॒ असः॑ ॥६॥
यत्क्षु॒रेण॑ म॒र्चय॑ता सु॒पेश॑सा॒ वप्ता॒ वप॑सि॒ केशा॑न् ।
शु॒न्धि शिरो॒ मास्यायुः॒ प्र मो॑षीः ॥७॥
उ॒प्त्वाय॒ केशा॒न्वरु॑णस्य॒ राज्ञो॒ बृह॒स्पति॑स्सवि॒ता सोमो॒ अग्निः॑ ।
तेभ्यो॑ नि॒धानं॑ बहु॒धान्व॑विन्द॒न्नन्त॒रा द्यावा॑पृथि॒वी अप॒स्सुव॑ः ॥८॥

प्रथमः खण्डः ॥१॥

आयु॒र्दा दे॑व ज॒रस॑ं गृणा॒नो घृ॒तप्र॑तीको घृ॒तपृ॑ष्ठो अग्ने ।
घृ॒तं पिब॒न्नमृ॑तं चारु॒ गव्यं॑ पि॒तेव॑ पु॒त्रं ज॒रसे॑ नये॒मँ स्वाहा॑ ॥१॥
आ ति॑ष्ठे॒ममश्मा॑न॒मश्मे॑व॒ त्वँ स्थि॒रो भ॑व ।
अ॒भि ति॑ष्ठ पृतन्य॒तस्सह॑स्व पृतनाय॒तः ॥२॥

5 See Āśv. I, 17, 13. 6a °स्र चायुषेवपत् B. °स्र चायुषेवर्पत् E. 6b °म्यसावा° E.—वर्चसा यथा B. 7a सुपेशसा B. 7b शुंधि शिरो B. T. शुन्धिशिरो E. मुन्धि शि° Wh. HHg. मुञ्चि शि° Bu. शुंजि (शुचं कुरु) Hw. मुञ्चि (शुचं कुरु) Hbd. Hbg. See Āśv. I, 17, 16; Pār. II, 1, 19; Av. VIII, 2, 17. 8b °न्वविंदन्न° E.—सुवः B. E. Wh. T. सुवाः Bu. स्वः H.—प्रथमः खण्डः Wh. ॥१॥ Bu. ॥१॥ उष्णेन पञ्चदश ॥१॥ E. B. II, 2, 1b स्वाहा deest in Bu. Wh. T.—Cf. Av. II, 13, 1; TBr. I, 2, 1, 11; Śāṅkh. I, 25, 6. 2a भवा Bu. See I, 5, 1.

NATIONAL ARCHIVES OF INDIA

रेवतीस्त्वा व्यक्षण्न्कृत्तिकाश्चाकृतँस्त्वा ।
धियोऽवयन्नव ग्रा अवृञ्जन्त्सहस्रमन्ताँ अभितो अयच्छन् ॥३॥
देवीर्देवायं परिधी संविचे महन्तदांसामभवन्महित्वनम् ॥४॥
या अकृन्तन्नवयन्या अतन्वत याश्च देवीरन्तानभितोऽददन्त ।
तास्त्वा देवीर्जरसे सं व्ययन्त्वायुष्मानिदं परि धत्स्व वासः ॥५॥
परि धत्त धत्त वाससैनँ शतायुषं कृणुत दीर्घमायुः ।
बृहस्पतिः प्रायच्छद्वास एतत्सोमाय राज्ञे परि धातवा उ ॥६॥
जरां गच्छासि परि धत्स्व वासो भवा कृष्टीनामभिशस्तिपावा ।
शतं च जीव शरदस्सुवर्चा रायश्च पोषमुप सं व्ययस्व ॥७॥
परीदं वासो अधि धा स्वस्तयेऽभूरापीनामभिशस्तिपावा ।
शतं च जीव शरदः पुरूचीर्वसूनि चार्यो वि भजासि जीवन् ॥८॥
इयं दुरुक्तात्परिबाधमाना श्रमं वरूथं पुनती न आगात् ।
प्राणापानाभ्यां बलमाभरन्ती प्रिया देवानाँ सुभगा मेखलेयम् ॥९॥

3a व्यक्षण् E. Bu. Wh. Hbg. P. T. व्यचण् B. HHg. व्यचिण् and व्यचिणात् Hw. अव्यक्षण् Hbd. See Introd., p. xxii seq.—°काश्चाकृतँस्त्वा E. B. Bu. Wh. P. अकृतन् Hw. HHg. अकृंतन् T. Hbd. अकृन्तन् Hbg. 3b अवृञ्जत्स° E. अवृजत्स° B. आवृजन् स° Bu. अवृञ्जन् स° Wh. अवावृञ्जन् Hw. त्वा आवृंजन् Hbd. त्वा अवृञ्जन् Hbg. HHg. 5a अकृंतंन्न° E.—°भितोऽददन्त Av. XIV, 1, 45. °भितोदद्दंत E. B. °भितोददन्ता Bu. Cf. MBr. I, 1, 5; Pār. I, 4, 13; Hir. I, 4, 2. 6–8 See Av. II, 13, 2–3; XIX, 24, 4–6; MBr. I, 1, 6. 6b धत्तवा उ E. B. Hir. I, 4, 2 7a भवतु Bu.—See Hir. I, 4, 2. 8a See Introd., p. xxiii. 8b चाद्यो E. See Hir. I, 4, 3. 9 Cf. MBr. I, 6, 27; Pār. II, 2, 8; Śāṅkh. II, 2, 1; Hir. I, 4, 4.

NATIONAL ARCHIVES OF INDIA

ऋतस्य गोप्त्री तपसः परस्पी घृती रक्षस्सहमाना अरातीः ।
सा नस्समन्तमनु परीहि भद्रया भर्तारस्ते मेखले मा रिषाम ॥१०॥
मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं समिद्धम् ।
अनाहनस्यं वसनं जरिष्णु परीदं वाज्यजिनं दधेऽहम् ॥११॥

द्वितीयः खण्डः ॥२॥

आगन्त्वा समगन्महि प्र सु मृत्युं युयोतन ।
अरिष्टास्सं चरेमहि स्वस्ति चरतादिह स्वस्त्या गृहेभ्यः ॥१॥
समुद्रादूर्मिर्मधुमाँ उदारदुपाँशुना समममृतत्वमश्याम् ।
इमे नु ते रश्मयस्सूर्यस्य येभिस्सपित्वं पितरो न आयन् ॥२॥
अग्निष्टे हस्तमग्रभीत्सोमस्ते हस्तमग्रभीत्सविता ते हस्तमग्रभीत्सरस्वती ते हस्तमग्रभीत्पूषा ते हस्तमग्रभीदर्यमा ते हस्तमग्रभीदँशस्ते हस्तमग्रभीद्भगस्ते हस्तमग्रभीन्मित्रस्ते हस्तमग्रभीन्मित्रस्त्वमसि धर्मणाग्निराचार्यस्तव ॥३-१२॥

10a परस्पी Wh. H. P. T. परस्वी B. E. Bu. MBr. I, 6, 28. 10b परेहि E. 11a For बलीयस्तेजो यशस्वि (B. E.) one expects बलीयस्तेजोयशस्वि.—समिद्धं MSS. and H. समृद्धं Sāṅkh. II, 1, 30. See Hir. I, 4, 6, and Introd., p. xxiii. 11b °ध्यजिनं B. II, 3, 1a °गन्महि प्र सुमृत्युं E.—युयोतना Bu.—See MBr. I, 6, 14; Hir. I, 5, 1. 2a See Rv. IV, 58, 1a; TĀ. X, 10, 2. 2b See Rv. I, 109, 7b, and Introd., p. xxx. 3-12 These are, according to the commentaries on Āp. 10, 12, ten Mantras, and 13-23 are eleven Mantras. So also T. Hw. HHg. have हस्तग्रहणमन्त्राः and परिदानमन्त्राः, but Hbd. हस्तग्रहणमन्त्रः and परिदानमन्त्राः, while Hbg. gives हस्तग्रहणमन्त्रः and परिदानमन्त्राः.

NATIONAL ARCHIVES OF INDIA

अग्नये त्वा परि दद्म्यसौ[13] सोमाय त्वा परि दद्म्यसौ[14] सवित्रे त्वा परि दद्म्यसौ[15] सरस्वत्यै त्वा परि दद्म्यसौ[16] मृत्यवे त्वा परि दद्म्यसौ[17] यमाय त्वा परि दद्म्यसौ[18] गदाय त्वा परि दद्म्यसावन्तकाय त्वा परि दद्म्यसावज्रस्त्वा[20] परि दद्म्यसावोषधीभ्यस्त्वा[21] परि दद्म्यसौ[22] पृथिव्यै त्वा सवैश्वानरायै परि दद्म्यसौ ॥१३-२३॥

देवस्य त्वा सवितुः प्रसव उप नयेऽसौ ॥२४॥

सुप्रजाः प्रजया भूयास्सुवीरो वीरैस्सुवर्चा वर्चसा सुपोषः पोषैः ॥२५॥

ब्रह्मचर्यमागामुप मा नयस्व देवेन सविता प्रसूतः ॥२६॥

को नामासि ॥२७॥ असौ नामास्मि ॥२८॥ कस्य ब्रह्मचार्यस्यसौ ॥२९॥ प्राणस्य ब्रह्मचार्यस्मि ॥३०॥

The MSS. of the text read अग्निष्टे to °स्त्वं without a break, and again अग्नये त्वा to °नराये परि दद्म्यसौ without a break. 3–11 अग्रहीत् Bu. 8–9 °अभीद्दँश्ते B. 12 कर्मणा° Bu.—°चार्यस्त्वा E. °चार्यस्त्वं B.—See MBr. I, 6, 15; Hir. I, 5, 9 seq.; Sāṅkh. II, 3, 1. 23 सवैश्वानराये E. B.—दद्म्यसौ E.—See Hir. I, 6, 5; Sāṅkh. II, 3, 1; MBr. I, 6, 23 seq.; Kauś. 56, 13. 24 नयेसौ B. नयेसौ E. See Introd., p. xxiii.—Cf. Hir. I, 5, 8; Āśv. I, 24, 15; Sāṅkh. II, 2, 12; MBr. I, 6, 18; TĀ. III, 10, 1. 25 भूयासँ E. Hir. I, 5, 13. 26 ब्रह्मचर्य° E.—°मागाम् H. °मा गाम्?—नयस्वा Bu.—See Hir. I, 5, 2; MBr. I, 6, 16; Kauś. 55, 9. 27 को नामा° E.—See Hir. I, 5, 4 seq.; MBr. I, 6, 17; Kauś. 55, 10. 29 ब्रह्मचार्यसौ E. 30 See Hir. I, 6, 3; Āśv. I, 20, 8.

NATIONAL ARCHIVES OF INDIA

असावेष ते देव सूर्य ब्रह्मचारी तं गोपाय स मा मृतेष ते सूर्य पुत्रस्य दीर्घायुस्य मा मृत । याँ स्वस्तिमग्निर्वायुस्सूर्यश्चन्द्रमा आपोऽनु संचरन्ति ताँ स्वस्तिमनु सं चरासौ ॥३१॥

अध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीय ॥३२॥

तृतीयः खण्डः ॥३॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे ।
सखाय इन्द्रमूतये ॥१॥

इममग्न आयुषे वर्चसे कृधि प्रियँ रेतो वरुण सोम राजन् ।
मातेवास्मा अदिते शर्म यच्छ विश्वेदेवा जरदष्टिर्यथासत् ॥२॥

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥३॥

अग्निष्ट आयुः प्रतरां दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु ।
इन्द्रो मरुद्भिर्ऋतुधा कृणोत्वादित्यैस्ते वसुभिरा दधातु ॥४॥

31 स मा मृत । यां Wh. Bu. समामृतयाँ E. समामृतायाँ B.—See Hir. I, 6, 3; Âśv. I, 20, 7; Śāṅkh. II, 18, 3. 32 Mantras 26–32 in B. and 27–32 in E. are given without any break, as regards accentuation and Sandhi. Bu. and Wh. mark only the end of 31a and of 31 by bars.—°श्रीया Bu.—तृतीयः खण्डः Wh. ॥३॥ Bu. ॥३॥ आगंचा दश ॥३॥ B. ॥११ अगंचा दश ॥३॥ E. II, 4, 1 and 2 Only Wh. gives the two Mantras in full, the other MSS. give the Pratîkas, viz. योगेयोगे तवस्तरमिममग्न आयुषे वर्चसे कृधीति द्वे ॥ See I, 6, 3 (Rv. I, 30, 7), and Ts. II, 3, 10, 3; TBr. II, 7, 7, 5. 3 Rv. I, 89, 9. 4 See Hir. I, 7, 11.

NATIONAL ARCHIVES OF INDIA

मेधां मह्यमङ्गिरसो मेधाँ सप्तर्षयो ददुः ।
मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे ॥ ५॥
अप्सरासु च या मेधा गन्धर्वेषु च यद्यशः ।
दैवी या मानुषी मेधा सा मामा विशतादिह ॥ ६॥
इमं मे वरुण ॥ ७॥ तत्त्वा यामि ॥ ८॥ ब्रं नो अग्ने ॥ ९॥ स
त्वं नो अग्ने ॥ १०॥ त्वमग्ने अयासि ॥ ११॥
राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषम् ॥ १२॥
तत्सवितुर्वरेण्यमित्येषा ॥ १३॥

5a सप्त ऋषयो B.T.—See Rv. Khila 29, 1. 6a अप्सरासु या Bu.Wh. 6b मानुषी E.—मामा E.—See Rv. Khila 29, 3; TĀ. X, 41; Hir. I, 8, 4. 7–11 See I, 4, 12–16. 12 राष्ट्रभृद्° E. राष्ट्रभृत° B pr. m. राष्ट्रभृद्° B sec. m.—See Hir. I, 6, 9; 12, 17. 13 All the MSS. give only the Pratīka of the Sāvitrī (Rv. III, 62, 10; Ts. I, 5, 6, 4). According to Āp. 11, 9–12 (see Haradatta on 11, 12, and cf. Hir. I, 6, 11) it has to be recited as follows:

ओं भूस्तत्सवितुर्वरेण्यम् । or, तत्स° . . . °ण्यमों भूः ।
ओं भुवर्भर्गो देवस्य धीमहि । or, भर्गो . . . °महीं भुवः ।
ओँ सुवर्धियो यो नः प्रचोदयात् । or, धियो . . . °यादोँ सुवः ।
ओं भूस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । or, तत्स° . . . °महीं भूः ।
ओं भुवर्धियो यो नः प्रचोदयात् । or, धियो . . . °यादीं भुवः ।
ओँ सुवस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥
or, तत्स° . . . °यादोँ सुवः ॥

NATIONAL ARCHIVES OF INDIA

अवृधमसौ सौम्य प्राण स्वं मे गोपाय ॥१४॥
ब्रह्मण आणी स्थः ॥१५॥

तुरीयः खण्डः ॥४॥

सुश्रवस्सुश्रवसं मा कुरु यथा त्वँ सुश्रवस्सुश्रवा अस्येवमहँ सुश्रवस्सुश्रवा भूयासं यथा त्वँ सुश्रवो देवानां निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम् ॥१॥

स्मृतं च मेऽस्मृतं च मे तन्म उभयँ व्रतं[2] निन्दा च मेऽनिन्दा च मे तन्म उभयँ व्रतँ[3] श्रद्धा च मेऽश्रद्धा च मे तन्म उभयँ व्रतं[4] विद्या च मेऽविद्या च मे तन्म उभयँ व्रतँ[5] श्रुतं च मेऽश्रुतं च मे तन्म उभयँ व्रतँ[6] सत्यं च मेऽनृतं च मे तन्म उभयँ व्रतं[7] तपश्च मेऽतपश्च मे तन्म उभयँ व्रतं[8] व्रतं च मेऽव्रतं च मे तन्म उभयँ

